न्तादिति वक्ष्यति तस्यायं पुरस्तादपकर्षः) समाहारे इति। भाष्ये - अपकर्षः अपवाद इत्यर्थः Udyota *on* Pradī. iv.265B.32 (*on* v.1.37); **8** impediment, hindrance मुख्यार्थहतिर्दोषः ... हतिरपकर्षः KāvyPra.264.2; **9** the word or expression *apakarṣa* कियन्तोऽपि सानुप्रासा शब्दा यथा ... अमर्ष अपकर्ष KāvyKaVṛ. 21.2 (1.4); कर्तृव्युत्पन्नोऽपकर्षशब्दः NyāySu. (So.) i.81.6 (*on* i.2.24); ईश्वरज्ञानं च न तथा ... उत्कर्षापकर्षशब्दप्रवृत्तिनिमित्तजातिमत्त्वाद्वेत्यादि TattvCin. iv(1). 462.1.

**अपकर्षक** (apa-karṣaka) *adj.* **1** which draws back or transfers (performance of a rite) to an earlier time इदं हि वचनमभिषेचनात् प्राचां सर्वेषां विदेवनादीनामपकर्षकम् TantrRa.206.14; **2** which lessens , i.e. depresser दोषास्तस्यापकर्षकाः। श्रुतिदुष्टापुष्टार्थत्वादयः ... साक्षात्काव्यस्यात्मभूतं रसमपकर्षयन्तः काव्यस्यापकर्षका इत्युच्यन्ते SāhiDa.24.6; रसापकर्षका दोषाः SāhiDa. 379.4; (द्योतकतायाः) अस्याश्चमत्कारस्यापकर्षकं यावत् तत्सर्वमपि दोषः RasGaṅ.255.8.

**अपकर्षक** (apa-karṣaka) *m.* type of breath (*lit.* drawn back) (प्राणायामः) स च पञ्चविधः ... पूरकः कुम्भकश्चैव रेचको ह्यपकर्षकः MālinīT. 17.3; रेचकः ... स्थानसंस्तम्भितो वायुः ... तस्मादपि पुनः स्थानं यतो नीतस्तदाहृतः। अपकर्षक इत्युक्तः MālinīT. 17.10.

**अपकर्षकवचन** (apakarṣaka-vacana) *n.* statement declaring transference (of performance of a rite) back to an earlier time ये तु प्रोक्षणादयः ... तेषामपकर्षकवचनाभावेन देक्षकाल एवानुष्ठेयत्वेन गृह्यमाणविशेषत्वेऽपि ... नावृत्तिः BhāṭṭDī. iv.177.5 (*on* xi.3.4)

**अपकर्षकारण** (apakarṣa-kāraṇa) *n.* **1** cause of inferiority व्यतिरेकस्य हेतुः उपमेयगतमुत्कर्षनिमित्तमुपमानगतमपकर्षकारणम् KāvyPra.647.1; **2** cause of drawing back or transfer (of word) to an earlier section विध्यानर्थक्यं हि तं कर्मशेषं प्रतीत्यपकर्षकारणमुक्तम् NyāySu.(So.) 81.28 (*on* i.2.24)

**अपकर्षकारिन्** (apakarṣa-kārin) *adj.* causing inferiority मण्यन्तराणां गुणसंनिवेषश्चिन्तामणेर्न ह्यपकर्षकारी CaitaCan.29.1(1)

**अपकर्षकाल** (apakarṣa-kāla) *m.* period of decrease यावानेव चान्येषामन्तरकल्पानामुत्कर्षापकर्षकालः तावानेव प्रथमस्यापकर्षकालः पश्चिमस्य चोत्कर्षकालः AbhidhKoBh.180.12 (*on* 3.92)

**अपकर्षकाष्ठा** (apakarṣa-kāṣṭhā) *f.* **i** limit of decrease (in number) न च त्रित्वमपकर्षकाष्ठा Kiraṇā.65.9; **ii** limit of decrease (in size) अस्मादेतावद्भागमेव परिमाणमपकृष्यते नातोऽधिकमित्यस्यार्थस्य सिद्धौ अपकर्षकाष्ठाश्रयभूतं द्रव्यं सिध्यति NyāySu.(Ja.) 343A.9 (*on* ii.2.6); अपकर्षकाष्ठापन्नानि स्थलभूतानि स्वविशेषगुणवद्द्व्योपादानकानि SāṁkhyaPraBh.31.34 (*on* 1.62)

**अपकर्षगन्ध** (apakarṣa-gandha) *m.* bit of inferiority महत्त्वाच्च गुरुत्वाच्च महाभारतमीरितम् ... इत्यादिवचनानि ... न पुनर्वेदानामपकर्षगन्धमभिदधते PāñcRāRa.26.6.

**अपकर्षण** (apa-karṣaṇa) *n.* **1A** act of removing, removal **B** removal by pulling out, extraction **2A** act of taking away or leading by enticing to a distant place **B** act of taking or snatching away, act of stealing **3A** degradation **B** inferiority **4A** emaciation or weakening **B** act of flattening of note **5** (fig.) indulgence **6A** act of drawing down **B** act of rubbing backward **C** act of drawing back, i.e. precedence **7** separation **8A** transference (of performance of a rite) to an earlier time **B** act of drawing back (word) to an earlier context, anticipation **9** act of depriving of **10** subtraction **1A** act of removing, removal शुचीनाह ...। लेपगन्धापकर्षणे शौचममेध्यलिप्तस्याद्भिर्मृदा च VāsiDS.3.48; Mitā. 66.21 (*on* 1.191); शल्मले रूषा। आत्मना यत्कृतं कृत्स्नं शाखानामपकर्षणम्। हीनपुष्पाग्रशाखस्त्वम् ... मद्वीर्यवशगोऽभवः MahāBhā.xii.151.23; मलजान् संचक्ष्महे ... नामानि यूकाः पिपीलिकाश्च ... चिकित्सितं तु खल्वेषामपकर्षणम् CaraS. iii.7.10; iii.7.14; विशुद्धिः ... मलानामपकर्षणम् ParaS. 12.28; MahNirvāT.8.71; औषधम् ... पुनरपि च त्रिविधम्। अपकर्षणं प्रकृतिविधानं निदानत्यागश्च। ते पुनरपकर्षणादयो द्विविधाः बाह्याभ्यन्तरभेदेन। तत्र बाह्यमपकर्षणं ग्रन्थ्यर्बुदोपपक्ष्मकृमिशल्यादिषु शस्त्रहस्तयन्त्रादिभिः AṣṭāSaṁ.i.74.15 (1.12); महारजनादिरूपाणां चात्मानं धूपयित्वा स्थितानामपकर्षणं ज्ञानकर्मभ्याम् BrahmSūBh. (Bhā.) 210.17 (*on* iii.4.26); केनाप्युपायेनोपनिषत्सकाशात्तावच्छ्रद्धापकर्षणं कर्तव्यम् PraboCan.2.33 (37.5); दीप्ताग्नेर्धातवः समाः। धातुसात्म्याद्य रोगाणां सर्वेषामपकर्षणम् Hastyāyur.1.3 (29.14); **1B** removal by pulling out, extraction सशल्यः क्लिश्यते प्राणैर्विशल्यो विनशिष्यति। इति मामविशच्चिन्ता तस्य शल्यापकर्षणे Rāmā.ii.1415*(2); तत्रापकर्षणं हस्तेनाभिगृह्य। विमृश्योपकरणवतापनयनमुपकरणेन वा CaraS. iii.7.15; यस्तु क्षतेषूपयुज्यते स भूयःकल्प इति संज्ञां लभते निरुद्धालेपनसंज्ञस्तेनास्रावसंनिरोधो मृदुता पूतिमांसापकर्षणमनन्तर्दोषता व्रणशुद्धिश्च भवति SuśruS. i.18.6; **2A** act of taking away or leading by enticing to a distant place मृगरूपधरेणाथ रक्षसा सोऽपकर्षणम्। भ्रातुरागमनं चैव चिन्तयन्पर्यतप्यत (रामः) MahāBhā.iii.263.12; Rāmā.i.App.1.106; प्रकृतिप्रग्रहाकृष्टं पार्श्वैर्वनचरादिभिः। हन्यात् प्रवीरपुरुषैर्भङ्गदानापकर्षणैः NītiSā.19.56; **2B** act of taking or snatching away, act of stealing उपायैर्विविधैः सर्वैः कल्पयित्वापकर्षणम्। सुप्तप्रमत्तमत्तेभ्यः स्तेयमाहुः NāraSm. 206.17; प्रकीर्णम् ... त्रिविधं प्रोक्तम् ... क्षुद्रमध्योत्तमानां च द्रव्याणामपकर्षणात्। अपकर्षणमपहरणम् DaṇḍaVi. 140.10; **3A** degradation अकस्मात्प्रक्रिया नृणामकस्माच्चापकर्षणम्। शुभाशुभे महत्त्वं च प्रकर्तुं बुद्धिलाघवात् MahāBhā. xii.112.84; **3B** inferiority इदं ममोत्कर्षणमिदमपकर्षणम् TattvPradī. (A.) 334.3 (*on* 3.41); **4A** emaciation or weakening गात्राणामपकर्षणम्। ... यस्य स्यादचिरेणैव उन्मादं सोऽधिगच्छति SuśruS. vi.62.6; **4B** act of flattening of note स्वगतशरीरस्वरानुसारेण च सारणोपयोगिन उत्कर्षापकर्षणसंभवात् प्रतिबिम्बत्वमुक्तम् AbhinBhā. iv.11.23 (*on* 28.21); अतःपरं तु रक्तिघ्नं न कार्यमपकर्षणम् SaṁgīRa.i.78.2 (i.3.22); **5** (fig.) indulgence (विषयेष्वप्रसक्तिश्च क्षत्रियस्य) विप्रादीनां व्यसनैर्नापकर्षणम् ... य एव व्यसनी तस्यैव नाशो राज्ञस्तु व्यसनाकृष्टत्वे राष्ट्रस्यैव विनाशः ManvaVi.71.6 (*on* 1.89); **6A** act of drawing down (गर्भस्य) उत्कर्षणापकर्षण॰ ... ॰दारणानि चैकहस्तेन गर्भं गर्भिणीं वा हिंसता तस्मादधिपतिमापृच्छ्य परं च यत्नमास्थायोपक्रमेत् SuśruS. iv.15.3; पृथिव्यामभिमानिनि या देवता प्रसिद्धा सैषा पुरुषस्य अपानम् ... वशीकृत्याध एवापकर्षणेनानुग्रहं कुर्वती वर्तते PraśnaUBh. 265.8 (3.8); **6B** act of rubbing backward सकृदेव मुसलस्योद्यमननिपातने कृत्वोत्सृज्येत, उपलाया वा प्रकर्षणेपकर्षणे, यदेषां कार्यं तन्नैव निर्वर्त्येत ŚābaBh.2115.12 (*on* xi.1.27); **6C** act of drawing back, i.e. precedence उत्पत्तेरपकर्षणं करोमि ŚlokaVār. 5 (3).239 (337.5); तदेनमितः पक्षाभासाद् व्यावर्तयामीति प्राक् तावदुत्पत्तेरपकर्षणं करोति Kāśi. 186.27 (*on* 5.240); **7** separation अभिव्यापकर्षणमपवर्गः। यथा अस्वेद्या विषोपसृष्टा, अन्यत्र कीटविषादिति SuśruS. vi.65.18 (comm. कस्यचित्पदार्थस्य तेभ्यो गुणक्रियादिभ्यः पृथक्करणमपवर्गः); **8A** transference (of performance of a rite) to an earlier time (एष विधिः) संध्ययोरुभयोश्चैव वापकर्षणमिष्यते LaghvāśvaSm. 1.139; तत्रोपरितने प्रकरणे वृद्धावुपस्थितायां सपिण्डीकरणापकर्षणं वक्ष्यते CaturCin. iii (1). 296.3; **8B** act of drawing back (word) to an earlier context, anticipation प्रकरणं च विधौ नान्यत्र क्वचिदस्त्यपकर्षणम् NayaMañ. III. iv.3.6; सूत्रेषूत्तरत्र कृतस्यपूर्वत्रापकर्षणं वैचित्र्याय LaŚabdeŚe. i.533.25 [कर्षणं त्वपकर्षणे ŚabdaRaSaK. 110.4]; **9** act of depriving भवतोऽप्येवं स्वामित्वादपकर्षणम्। न युक्तं यदि तस्यापि क्षणिकत्वं समस्ति न TattvSaṁ. 2552; **10** subtraction शून्ययुतो राशिः स्यादविकृत एवापकर्षणे ĀryaSi. 15.10 (146).

**अपकर्षण** (apa-karṣaṇa) *adj.* **A** which deprives or prevents सत्यमस्त्रं महाबाहो तथा मायाधरं परम्। घोरं तेजःप्रभं नाम परतेजोपकर्षणम् Rāmā. i.26.18; **B** which destroys एष वर्षामि शिशिरं दैत्यमायापकर्षणम् HariVaṁ. 36.11; गव्यक्षीरोत्थितं सर्पिः ... दृष्टिप्रसादनं श्रेष्ठ तिमिरस्यापकर्षणम् SiddhYo. 61.69; **C** which reduces or lessens दग्धायामवनौ जाताः शालयः ... रूक्षाः श्लेष्मापकर्षणाः SuśruS. i.46.15; न नास्ति सदृशं तेन किंचित् स्थौल्यापकर्षणम् SuśruS. iv.24.41.

**अपकर्षणक्रिया** (apakarṣaṇa-kriyā) *f.* **1** act of drawing or transferring (word or meaning) to an earlier context पूर्वं कायस्येत्यत्रापि निर्द्धारणं स्यात्। अस्ति हि अत्रापि अपकर्षणक्रिया निर्धारणहेतुः Nyās. i. 378.12 (*on* ii.2.1); **2** act of removing by pulling out, extraction विलापनावसाधनरक्तापकर्षण॰ ... ॰वेधनापकर्षणक्रिया॰ ... इत्येते चतुश्चत्वारिंशद्व्रणोपक्रमा भवन्ति Hastyāyur. 386.24 (3.5)

**अपकर्षणता** (apakarṣaṇa-tā) *f.* the state of removing मुदिता धर्मालोकमुखं सर्वारत्यपकर्षणतायै संवर्तते LaliVi. 4.0 (39) [DBHS.]

**अपकर्षणत्व** (apakarṣaṇa-tva) *n.* the state of removing आद्यं दिनचतुष्टयं संस्कारमात्रजनकत्वादन्त्यं च भल्लातकसंस्कारापकर्षणत्वान्न वृद्धा भिषजो गणयन्ति Comm. *on* SuśruS. iv.6.17.

**अपकर्षणयोग** (apakarṣaṇa-yoga) *m.* [Abl.] on account of drawing or dragging अभि(गमनं प्रति) गमनादपकर्षणयोगान्नाम साधूपक्रमाङ्गः Hastyāyur. 335.8 (2.71)

**अपकर्षणा** (apa-karṣaṇā) *f.* removal सर्वकामरतीनामपकर्षणा ŚikṣāSa. 183.5 [DBHS.]